# एककम् - ४



## कर्मैव समाराधना ।

*लोकेऽस्मिन् कर्मणा उन्नतिं प्राप्ताः महात्मानः बहवः सन्ति। वि.के. कृष्णमेनोन्, के.आर्. नारायणः, ए.पि.जे. अब्दुल्कलाम् इत्यादयः महापुरुषाः स्वप्रयत्नेनैव उन्नतिं प्राप्ताः। अस्माकम् इतिहासपुराणादिषु प्रयत्नस्य महत्त्वप्रतिपादिकाः कथाः सुलभाः सन्ति। "यः आलस्यं विना कर्म करोति स विजयं लभते" इति तत्त्वप्रतिपादिका पुराणप्रसिद्धा काचित् कथा, यत्नस्य महत्त्वप्रतिपादकानि चत्वारि सुभाषितानि च अस्मिन्नेकके अन्तर्भवन्ति।*



# ७. न निश्चितार्थाद् विरमन्ति धीराः ।

पुरा सूर्यवंशे भगीरथो नाम महाराजः आसीत्। कपिलमुनेः कोपानलेन दग्धानां पितॄणां मोक्षप्राप्त्यर्थं सः स्वर्गङ्गां भुवम् आनेतुं निश्चिकाय। तदर्थं सः कठिनं तपस्तेपे। तस्य तपसा सम्प्रीता गङ्गादेवी प्रत्यक्षीभूता। भगीरथः तु पितॄणां मोक्षार्थं पातालपर्यन्तम् अनुगमनाय गङ्गां ययाचे। सा एतत्प्रार्थनाम् अङ्गीकृत्य एवम् अवदत् - "आकाशात् पतन्तीं मां वोढुं परमेश्वरः एव समर्थः। अतः तं प्रार्थयस्व" इति। तदनुसृत्य भगीरथः परमेश्वरं सम्प्रार्थयत।

अनन्तरं किमभवत्?



यद्यपि गङ्गा परमेश्वरस्य शिरसि पतिता तथापि बहिः न प्रावहत्। तदा दुःखितः भगीरथः गङ्गायाः मोचनाय महेश्वरं प्रार्थयामास। भगीरथस्य प्रार्थनया सम्प्रीतः शिवः गङ्गां भूमौ बिन्दुरूपेण अपातयत्। एवं भूतलं प्राप्ता मन्दाकिनी यदा जह्नुमहर्षेःआश्रमं प्राप तदा सा सहसा अप्रत्यक्षा अभवत्।



भगीरथेन कृतः परिहारः कः?



अनन्तरं भगीरथः जाह्नवीं तां पातालम् अनयत्। एवं गङ्गाजलस्पर्शेन भगीरथस्य पितरः मुक्ताः अभवन्। निरन्तरयत्नेनैव भगीरथः स्वाभीष्टमलभत। अतः तीव्रस्य प्रयत्नस्य 'भगीरथप्रयत्न' इति प्रथा जाता।

**पदच्छेदः।**

| | | |
|---|---|---|
| तपस्तेपे | - | तपः + तेपे। |
| निरन्तरयत्नेनैव | - | निरन्तरयत्नेन + एव। |
| परिहारोऽपि | - | परिहारः + अपि |
| भगीरथो नाम | - | भगीरथः + नाम |
| यद्यपि | - | यदि +अपि |
| लोकेऽस्मिन् | - | लोके +अस्मिन् |

**विग्रहाः।**

| | | |
|---|---|---|
| एतत्प्रार्थना | - | एषा चासौ प्रार्थना च। |
| जाह्नवी | - | जह्नोः अपत्यं स्त्री। |
| भागीरथी | - | भगीरथस्य अपत्यं स्त्री। |
| महेश्वरः | - | महान् च असौ ईश्वरः च। |

## पठनप्रवर्तनानि।

❖ नीञ् , याच् धात्वोः प्रयोगसहितानि वाक्यानि कथायाः चित्वा लिखतु। तत्र वर्तमानानि प्रधानकर्माणि अप्रधानकर्माणि च विवेचयतु।

उदा - पितॄणां मोक्षप्राप्त्यर्थं सः स्वर्गङ्गां भुवम् आनेतुं निश्चिकाय।

स्वर्गङ्गाम् - प्रधानकर्म

भुवम् - अप्रधानकर्म

❖ गङ्गायाः भगीरथस्य च सम्भाषणं संभाव्य लिखतु। कक्ष्यायाम् अवतारयतु ।

**श्रद्धेयाः अंशाः।**

- आशयव्यक्तता।
- विषयावबोधः।
- संभाषणशैली।





❖ प्रयत्नेन उन्नतिं प्राप्तानां केषाञ्चित् महात्मनां ह्रस्वं जीवनचरितं लिखतु।

**श्रद्धेयाः अंशाः।**

- आशयव्यक्तता।
- विषयावबोधः।
- जीवनचरितस्य घटना। (जन्म, जन्मदेशः, कालः पितरौ, विद्याभ्यासः, प्रवर्तनानि एवमादयः)

❖ चित्राणि निरीक्ष्य कथां लिखतु।

**श्रद्धेयाः अंशाः।**

- चित्रैः सूचितानाम् आशयानां स्वीकारः।
- आशयव्यक्तता।
- आशयक्रमीकरणम्।
- उचितशीर्षकम्।
- भावना।









# ८. उद्योगी लभते श्रियम् ।

प्रयत्नस्य महत्त्वप्रतिपादकानि नैकानि सुभाषितानि सन्ति। तेषु कानिचन शृणोतु-

**न दैवमिति सञ्चिन्त्य**
**त्यजेदुद्योगमात्मनः।**
**अनुद्यमेन कस्तैलं**
**तिलेभ्यः प्राप्तुमर्हति।।१।।**

**पदच्छेदः।**

| | | |
|---|---|---|
| कस्तैलम् | - | कः + तैलम्। |
| त्यजेदुद्योगमात्मनः | - | त्यजेत् + उद्योगम् + आत्मनः। |
| दैवमिति | - | दैवम् + इति |

**अन्वयः** दैवम् इति सञ्चिन्त्य आत्मनः उद्योगं न त्यजेत्। कः अनुद्यमेन तिलेभ्यः तैलं प्राप्तुम् अर्हति?

**आशयः** सर्वं भाग्याधीनमिति मत्वा उद्यमरहितो भवितुं नार्हति। प्रयत्नं विना तिलात् तैलम् उत्पादयितुं को वा शक्नुयात्? न कोऽपि शक्नुयादिति भावः।

**विग्रहाः।**

| | | |
|---|---|---|
| अनुद्यमेन | - | न उद्यमः अनुद्यमः तेन। |
| तैलम् | - | तिले भवम्। |

**योजनानां सहस्रं तु**
**शनैर्गच्छेत् पिपीलिका।**
**अचलन् वैनतेयोऽपि**
**पदमेकं न गच्छति।।२।।**



**पदच्छेदः।**

| | | |
|---|---|---|
| पदमेकम् | - | पदम् +एकम् |
| वैनतेयोऽपि | - | वैनतेयः + अपि। |
| शनैर्गच्छेत् | - | शनैः + गच्छेत्। |

**अन्वयः** पिपीलिका शनैः योजनानां सहस्रं गच्छेत्। वैनतेयःअचलन् एकं पदम् अपि न गच्छति।

**आशयः** पिपीलिका मन्दं मन्दं सञ्चरन्ती सहस्रयोजनपर्यन्तमपि गमिष्यति। शीघ्रगामी गरुडः तु आलस्येन न चलति चेत् एकं पदमपि गन्तुम् अशक्तः भवति।

**विग्रहः।**

वैनतेयः विनतायाः अपत्यं पुमान्।

**नात्युच्चशिखरो मेरु-**
**र्नातिनिम्नं रसातलम्।**
**व्यवसायद्वितीयानां**
**नातिपारो महोदधिः।।३।।**

**पदच्छेदः।**

| | | |
|---|---|---|
| नात्युच्चशिखरो मेरुः | - | न + अत्युच्चशिखरः + मेरुः |
| नातिनिम्नं | - | न +अतिनिम्नं |
| नातिपारोमहोदधिः | - | न +अतिपारः +महोदधिः |

**अन्वयः** व्यवसायद्वितीयानां मेरुः न अत्युच्चशिखरः। रसातलं न अतिनिम्नम्। महोदधिः न अतिपारः (भवति)।

**आशयः** प्रयत्नशालिनः अत्युन्नतं सुमेरुपर्वतम् आरोढुं तथा अत्यगाधं पातालम् अवरोढुमपि प्रभवन्ति। महासमुद्रमपि ते अनायासेन तरेयुः। प्रयत्नशालिनां किमपि असाध्यं नास्ति।

**विग्रहाः।**

| | | |
|---|---|---|
| अत्युच्चशिखरः | - | अत्युच्चं शिखरम् यस्य सः। |
| अतिपारः | - | पारम् (अपरं तीरम्) अतिक्रान्तः। |
| महोदधिः | - | महान् च असौ उदधिः च। |
| व्यवसायद्वितीयानाम् | - | व्यवसायः द्वितीयः येषां तेषाम्। |



**रत्नैर्महाब्धेस्तुतुषुर्न देवाः**
**न लेभिरे भीमविषेण भीतिम्।**
**सुधां विना न प्रययुर्विरामं**
**न निश्चितार्थाद्विरमन्ति धीराः।।४।।**

**पदच्छेदः।**

| | | |
|---|---|---|
| तुतुषुर्न | - | तुतुषुः + न। |
| निश्चितार्थाद्विरमन्ति | - | निश्चितार्थात् + विरमन्ति। |
| प्रययुर्विरामं | - | प्रययुः + विरामम्। |
| रत्नैर्महाब्धेस्तुतुषुर्न | - | रत्नैः + महाब्धेः+ तुतुषुः+ न। |

**अन्वयः** देवाः महाब्धेः रत्नैः न तुतुषुः। भीमविषेण भीतिं न लेभिरे। सुधां विना विरामं न प्रययुः। धीराः निश्चितार्थात् न विरमन्ति।

**आशयः** समुद्रमथनं कुर्वन्तः देवाः महासमुद्रात् लब्धैः विविधैः अमूल्यैः रत्नैः सन्तोषं न आपुः। भयङ्करस्य विषस्य दर्शनेन भीताः नाभवन्। ते देवाः दृढनिश्चयेन अमृतप्राप्तिपर्यन्तं कठिनप्रयत्नम् अकुर्वन्। धीराः निश्चितार्थलाभं यावत् प्रयत्नं कुर्वन्त एव भवेयुः।

## पठनप्रवर्तनानि।

❖ सुभाषितानि तालानुसारम् आलपतु।

**श्रद्धेयाः अंशाः।**

- उचितः तालः।
- अक्षरस्फुटता।
- आशयव्यक्तता।

❖ 'प्रयत्ने लक्ष्मीः प्रतिष्ठिता' इति विषयम् आधारीकृत्य सुभाषितानां साहाय्येन खण्डिकां लिखतु।



**श्रद्धेयाः अंशाः।**

- विषयावबोधः।
- आशयव्यक्तता।

❖ 'प्रयत्नस्य महत्त्वम्' इति विषयम् अधिकृत्य प्रभाषणं कक्ष्यायाम् अवतारयतु।

**श्रद्धेयाः अंशाः।**

- आशयव्यक्तता।
- विषयावबोधः।
- सभाकम्पं विना अवतारणम्।

## अनुबन्धः।

**शब्दकोशः।**

| | | | |
|---|---|---|---|
| अवगम्य | ज्ञात्वा | അറിഞ്ഞിട്ട് | having known |
| आश्रमः | मुनीनां वासस्थानम् | ആശ്രമം | hermitage |
| जाह्नवी | गङ्गा | ഗംഗ | The Ganges |
| तिरोधानम् | अन्तर्धानम् | മറയൽ | vanishing |
| तीव्रम् | कठिनम् | പ്രയാസമേറിയത് | difficult |
| तुतुषुः | तुष्यन्ति स्म | സന്തോഷിച്ചു | pleased |
| दग्धः | भस्मीभूतः | ചാമ്പലായ | burnt |
| निम्नं | अवचं | താഴ്ന്നത് | low |
| प्रथा | प्रसिद्धिः | പ്രസിദ്ധി | well known |
| भीमविषम् | भीकरगरलम् | ഉഗ്രവിഷം | deadly poison |
| भूः | भूमिः | ഭൂമി | earth |
| मन्दाकिनी | गङ्गा | ഗംഗ | The Ganges |
| महेश्वरः | परमेश्वरः | ശിവൻ | Lord Siva |
| यत्नः | उद्यमः | പരിശ്രമം | effort |
| रसातलम् | पातालम् | പാതാളം | nether world |
| वैनतेयः | गरुडः | ഗരുഡൻ | The Garuda |
| वोढुम् | धर्तुं | ധരിക്കുന്നതിന് | to bear |



| | | | |
|---|---|---|---|
| व्यवसायद्वितीयः | प्रयत्नसहायः | പ്രയത്നശീലൻ | enterprising |
| शनैः | मन्दम् | പതുക്കെ | slowly |
| सहसा | झटिति | പെട്ടെന്ന് | suddenly |
| सुधा | अमृतम् | അമൃത് | nectar |

## अव्ययानां प्रयोगः।

**यद्यपि - तथापि**

**यद्यपि** समुद्रे प्रभूतं जलमस्ति **तथापि** तत् पेयं न भवति।

**यद्यपि** जलार्थं कूपः खनितः **तथापि** जलं न लब्धम्।

**नाम** -(प्रसिद्धार्थः)

हिमालयो **नाम** नगाधिराजः अस्ति।

रावणो **नाम** राक्षसः आसीत्।

## अमरकोशः।

| | |
|---|---|
| राजा | राजा राट् पार्थिव क्ष्माभृन्नृपभूपमहीक्षितः। |
| दैवम् | दैवम् दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः। |
| रत्नं | रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च। |
| धीरः | धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः। |
| पद् | पादः पदंघ्रिश्चरणोऽस्त्रियाम्। |
| उदधिः | उदन्वानुदधिः सिन्धुः सरस्वान्सागरोऽर्णवः |
| सुधा | पीयूषममृतं सुधा। |
| देवः | अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः। |

## व्याकरणविशेषः।

महाराजः - नकारान्तः राजन् शब्दः समासान्ते अकारान्तः भवति।

विरमन्ति - आत्मनेपदी रम् धातुः वि इत्युपसर्गयोगे परस्मैपदी भवति।

निश्चितार्थाद् विरमन्ति - विरामार्थशब्दयोगे पञ्चमी।



**शब्दरूपाणि।**

**इकारान्तः पुल्लिङ्गः मुनिः शब्दः।**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | मुनिः | मुनी | मुनयः |
| सं.प्रथमा | हे मुने | हे मुनी | हे मुनयः |
| द्वितीया | मुनिं | मुनी | मुनीन् |
| तृतीया | मुनिना | मुनिभ्यां | मुनिभिः |
| चतुर्थी | मुनये | मुनिभ्यां | मुनिभ्यः |
| पञ्चमी | मुनेः | मुनिभ्यां | मुनिभ्यः |
| षष्ठी | मुनेः | मुन्योः | मुनीनाम् |
| सप्तमी | मुनौ | मुन्योः | मुनिषु। |

आकारान्तः स्त्रीलिङ्गः सुधा शब्दः।

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | सुधा | सुधे | सुधाः |
| सं.प्रथमा | हे सुधे | हे सुधे | हे सुधाः |
| द्वितीया | सुधां | सुधे | सुधाः |
| तृतीया | सुधया | सुधाभ्यां | सुधाभिः |
| चतुर्थी | सुधायै | सुधाभ्यां | सुधाभ्यः |
| पञ्चमी | सुधायाः | सुधाभ्यां | सुधाभ्यः |
| षष्ठी | सुधायाः | सुधयोः | सुधानाम् |
| सप्तमी | सुधायां | सुधयोः | सुधासु। |



सर्वनाम द कारान्तः तद् शब्दः पुंसि।

| | | | |
|---|---|---|---|
| प्रथमा | सः | तौ | ते |
| द्वितीया | तं | तौ | तान् |
| तृतीया | तेन | ताभ्यां | तैः |
| चतुर्थी | तस्मै | ताभ्यां | तेभ्यः |
| पञ्चमी | तस्माद् | ताभ्यां | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु। |

स्त्रियाम्

| | | | |
|---|---|---|---|
| प्रथमा | सा | ते | ताः |
| द्वितीया | तां | ते | ताः |
| तृतीया | तया | ताभ्यां | ताभिः |
| चतुर्थी | तस्यै | ताभ्यां | ताभ्यः |
| पञ्चमी | तस्याः | ताभ्यां | ताभ्यः |
| षष्ठी | तस्याः | तयोः | तासाम् |
| सप्तमी | तस्यां | तयोः | तासु। |

क्लीबे

| | | | |
|---|---|---|---|
| प्रथमा | तद् | ते | तानि |
| द्वितीया | तद् | ते | तानि |

शेषं पुंवद्



**धातुरूपाणि।**

ययाचे याचृ धातुः (उभयपदी) लिट् आ. प. प्र.पु.ए.व.।

| पुरुषः | एकवचनं | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | ययाचे | ययाचाते | ययाचिरे |
| म.पु. | ययाचिषे | ययाचाथे | ययाचिध्वे |
| उ. पु. | ययाचे | ययाचिवहे | ययाचिमहे। |

प्राप - प्र + आप्लृ व्याप्तौ लिट् प.प.प्र.पु.ए.व. ।

| | | | |
|---|---|---|---|
| प्र. पु. | प्राप | प्रापतुः | प्रापुः |
| म. पु. | प्रापिथ | प्रापथुः | प्राप |
| उ. पु. | प्राप | प्रापिव | प्रापिम। |

निरवहत् - निर् + वह् प्रापणे धातुः लङ् प.प.प्र.पु.ए.व.।

| | | | |
|---|---|---|---|
| प्र. पु. | निरवहत् | निरवहताम् | निरवहन् |
| म. पु. | निरवहः | निरवहतम् | निरवहत |
| उ. पु. | निरवहम् | निरवहाव | निरवहाम। |

अपातयत् - पत्लृ गतौ णिचि लङ् प.प.प्र.पु.ए.व.।

| | | | |
|---|---|---|---|
| प्र. पु. | अपातयत् | अपातयतां | अपातयन् |
| म. पु. | अपातयः | अपातयतं | अपातयत |
| उ. पु. | अपातयम् | अपातयाव | अपातयाम। |

प्रार्थयस्व - प्र + अर्थ् याच्ञायां लोट् आ.प.म.पु.ए.व

| | | | |
|---|---|---|---|
| प्र. पु. | प्रार्थयतां | प्रार्थयेतां | प्रार्थयन्ताम् |
| म. पु. | प्रार्थयस्व | प्रार्थयेथां | प्रार्थयध्वम् |
| उ. पु. | प्रार्थयै | प्रार्थयावहै | प्रार्थयमहै। |



# किमधिगतम् ?

## महात्मनःजीवनचरित-लेखनम्

| | स्वयं साधु कृतम् | सुहृदः साहाय्येन कृतम् | परिष्करणीयं वर्तते |
|---|---|---|---|
| विषयावबोधः | | | |
| जीवनचरितस्य घटनाः स्वीकृताः | | | |
| आशयव्यक्ततया लिखितम् | | | |

## कथालेखनम्

| | | | |
|---|---|---|---|
| चित्राणाम् अशयः स्वीकृतः | | | |
| उचितं शीर्षकं शैली च स्वीकृतम् | | | |
| भावना योजिता | | | |

## खण्डिकालेखनम्
## (प्रयत्ने लक्ष्मीः ..... )

| | | | |
|---|---|---|---|
| सुभाषितानाम् आशयः स्वीकृतः | | | |
| उदाहरणैः आशयस्य समर्थनम् | | | |
| आशयानां क्रमीकरणम् | | | |

## प्रयत्नस्य महत्त्वं - प्रभाषणम्

| | | | |
|---|---|---|---|
| आशयाः सञ्चिताः | | | |
| संबोधनम् उपसंहारः च स्वीकृतम् | | | |
| सभाकम्पं विना अवतारणम् | | | |